डुण्डुः, पुं, (डुमिति कृत्वा डयते गच्छतीति । डी+डुः ।) डुण्डुभसर्पः । इति त्रिकाण्डशेषः ॥

डुण्डुभः, पुं, (डुण्डुः सन् भातीति । डुण्डु इत्यनुकरणशब्देन भाति वा । भा+कः ।) सर्पविशेषः । ढोँड़ा इति भाषा । तत्पर्य्यायः । राजिलः २ इत्यमरः ।१।८।५॥ दुण्डुभः ३ । इति भरतः ॥ नागभृत् ४ डुण्डुः ५ । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते ।२।११।२८।
“एकदा स वने घोरं डुण्डुभं जरसान्वितम् ।
अपश्यद्दण्डमुद्यम्य हन्तुं तं समुपाययौ ॥”)

डुण्डुलः, पुं, (डुण्डुरिति शब्दं लातीति । ला+कः ।) क्षुद्रपेचकः । तत्पर्य्यायः । क्षुद्रोलूकः २ शाकुनेयः ३ पिङ्गलः ४ वृक्षाश्रयी ५ हृद्द्रावी ६ विशालाक्षः ७ भयङ्करः ८ । इति राजनिर्घण्टः ॥

डुलिः, स्त्री, (दुलि+पृषोदरादित्वात् साधुः ।) दुलिः । कमठी । इत्यमरटीकायां रायमुकुटः ॥

डुलिका, स्त्री, (डुलिरिव कायतीति । कै+कः । ततष्टाप् ।) खञ्जनाकारपक्षिविशेषः । इति जटाधरः ॥

डुली, स्त्री, (डुलिः+ङीष् वा ।) चिल्लीशाकः । इति राजनिर्घण्टः ॥

डोड़ी, स्त्री, क्षुपविशेषः । तत्पर्य्यायः । जीवन्ती २ शाकश्रेष्ठा ३ सुखालुका ४ बहुवल्ली ५ दीर्घपत्रा ६ सूक्ष्मपत्रा ७ जीवनी ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । दीपनत्वम् । कफवातकण्ठामयरक्तपित्तार्त्तिदाहनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥

डोमः, पुं, स्वनामख्यातास्पृश्यजातिः । यथा,—
“चाण्डालश्चैव डोमश्च शाणकश्च तथा इति ।
दण्डीरश्चैव भण्डीरो भूशुण्डश्च दयाश्रमी ॥
दधामुण्डी लिङ्गधारी सभा एते यशस्विनि ! ।
स्पृष्ट्वा प्रमादतः स्नात्वा गायत्र्यष्टशतं जपेत् ॥”
इति मत्स्यसूक्ततन्त्रे ३६ पटलः ॥

डोरं, क्ली, हस्तादिबन्धनसूत्रम् । यथा,—
“कोऽनन्त इत्युदीर्य्याथ धृत्वा तत्करपल्लवम् ।
बलादाकृष्य तड्डोरं क्षिप्तवान् पावकोपरि ॥”
इति भविष्यपुराणे अनन्तव्रतकथा ॥

डोरकं, क्ली, (डोर+स्वार्थे कन् ।) डोरम् । यथा,
“चतुर्द्दशग्रन्थियुक्तं कुङ्कुमाक्तं सुडोरकम् ।
स्त्रियश्च पुरुषश्चैव बध्नीयात् वामदक्षिणे ॥”
इति भविष्यपुराणे अनन्तव्रतकथा ॥

डोरली, स्त्री, (डोरमिव डयते इति । डी+क्विप् ।) बृहती । इति राजनिर्घण्टः ॥

---

## ढ

ढ, ढकारः । स व्यञ्जनचतुर्द्दशवर्णः । टवर्गचतुर्थवर्णश्च । (अर्द्धमात्राकालेनोच्चारणीयः ।) अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (पाणिनीयादिमते अस्योच्चारणे जिह्वामध्यभागेन मूर्द्ध्नः स्पर्शः आभ्यन्तरप्रयत्नः । संवारनादघोषा महाप्राणश्च वाह्यप्रयत्नाः । मातृकान्यासेऽस्य दक्षपादाङ्गुलीमूले न्यासक्रिया । वङ्गीयवर्णमालायाम् ।) तस्य लेखनप्रकारो यथा,—
“ऊर्द्ध्वाधःक्रमतो रेखा वामदक्षिणतो गता ।
ततः सा कुण्डलीरूपा विष्णीशब्रह्मरूपिणी ॥
महाशक्तिमयी मात्रा ध्यानमस्य प्रचक्ष्यते ।
रक्तोत्पलनिभां रम्यां रक्तपङ्कजलोचनाम् ॥
अष्टादशभुजां भीमां महामोक्षप्रदायिनीम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥”
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
“ढकारं परमाराध्यं या स्वयं कुण्डली परा ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा ॥
सदा त्रिगुणसंयुक्तं आत्मादितत्त्वसंयुतम् ।
रक्तविद्युल्लताकारं ढकारं प्रणमाम्यहम् ॥”
तस्य २६ षड्विंशतिनामानि यथा,—
“ढो ढक्का निर्णयः पूर्णो यक्षेशादनदेश्वरः ।
अर्द्धनारीश्वरस्तोयमीश्वरी त्रिशिखी मवः ॥
दक्षपादाङ्गुलेर्मूलं सिद्धिदण्डा विनायकः ।
प्रहासा त्रिवेरा ऋद्धिर्निर्गुणो निधनो ध्वनिः ॥
विघ्नेशः पाणिनी खड्गधारिणी क्रोड़पुच्छकः ।
एलापुरं त्वगात्मा च विशाखा श्रीमनोरतिः ॥”
इति नानातन्त्रशास्त्रम् ॥

ढः, पुं, (ढौकते उच्चैःशब्देन आप्नोति श्रवणेन्द्रियमिति । ढौक गत्यावरणयोः+डः ।) ढक्का । (यथा, तन्त्रे ।
“ढो ढक्का निर्णयः पूर्णो यक्षेशादनदेश्वरः ॥”)
श्वा । श्वलाङ्गूलम् । इति मेदिनी । ढे, १ ॥ निर्गुणः । ध्वनिः । इत्येकाक्षरकोषः ॥

ढक्कः, पुं, देशविशेषः । इति भूरिप्रयोगः ॥ ढाका इति भाषा ॥

ढक्का, स्त्री, (ढक् इति गभीरशब्देन कायतीति । कै+कः टाप् च ।) वाद्यविशेषः । ढाक इति भाषा । तत्पर्य्यायः । यशःपटहः २ । इत्यमरः ।१।७।६॥ विजयमर्द्दलः ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् ।२४७।
“ढक्कामाहत्य मदं वितन्वते करिण इव पिरं पुरुषाः ॥”)

ढक्कारी, स्त्री, (ढक्कां जयढक्कावत् गभीरसिंहनादं ऋच्छति समराङ्गणे इति । ऋ+अण् ङीप् च ।) तारिणी । यथा,—
“ढक्कारवा च ढक्कारी ढक्कारवरवा ढका ॥”
इति कुलसद्भावे तारासहस्रनामस्तोत्रम् ॥

ढट्टी, स्त्री, वाक्यविशेषः । यथा, रुद्रयामले अन्नपूर्णासहस्रनाम कथने ।
“ढट्टीवाक्यस्वरूपा च ढकाराक्षररूपिणी ॥”

ढालं, क्ली, (ढौकते आप्नोति शरीरं अनेन । ढौक+अच् । पृषोदरात् आले लत्वे च साधुः ।) फलकम् । ढालिपक्षजयकरीति अन्नदाकल्पीयसहस्रनामविवरणात् ॥

ढाली [न्] त्रि, (ढालमस्त्यस्येति । इनिः ।) ढालविशिष्टः । चर्म्मी । यथा,—
“ढालिपक्षजयकरी ढकारवर्णरूपिणी ॥”
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम् ॥

ढामरा, स्त्री, हंसी । इति धनञ्जयः ॥

ढुण्ढ, अन्वेषणे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ढाद्यन्तो दन्त्यनोपधः । ढयोगान्मूर्द्धन्यः । तेन यणादौ नलोपे ढुढ्यते इत्यादि । ढुण्ढति धनं लोकः । इति दुर्गादासः ॥

ढुण्ढिः, पुं, (ढुण्ढ्यतेऽसौ भक्तैरिति । ढुण्ढ अन्वेषणे+इन् ।) गणेशः । तन्नामकरणं यथा,— गणेशं प्रति शिववाक्यम् ।
“अन्वेषणे ढुण्ढिरयं प्रथितोऽस्ति धातुः
सर्व्वार्थढुण्ढिततया भव ढुण्ढिनामा ।
काशीप्रवेशमपि को लभतेऽत्र देही
तोषं विना तव विनायक ! ढुण्ढिराज ! ॥”
तन्माहात्म्यं यथा,—
“ढुण्ढे ! प्रणम्य पुरतस्तव पादपद्मं
यो मां नमस्यति पुमानिह काशिवासी ।
तत्कर्णमूलमधिगम्य पुरादिशामि
तत्किञ्चिदत्र न पुनर्भवतास्ति येन ॥”
“यः प्रत्यहं नमति ढुण्ढिविनायक ! त्वां
काश्यां प्रगे प्रतिहताखिलविघ्नसङ्घः ।
नो तस्य जातु जगतीतलवर्त्ति वस्तु
दुष्प्रापमत्र परत्र च किञ्च नापि ॥”
“प्रथमं ढुण्ढिराजोऽसि मम दक्षिणतो मनाक् ।
आढुण्ढ्य सर्व्वभक्तेभ्यः सर्व्वार्थान् संप्रयच्छसि ॥”
तस्य यात्राविधानं यथा,—
“माघशुक्लचतुर्थ्यान्तु नक्तं व्रतपरायणाः ।
ये त्वां ढुण्ढेऽर्च्चयिष्यन्ति तेऽर्च्याः सुरसुरद्विषाम् ॥
विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम् ।
शुक्लां शुक्लतिलैर्लड्डून् प्राश्नीयाल्लड्डुकान् व्रती ॥
काश्यां यात्रा प्रयत्नेन क्षेमसिद्धिमभीप्सुभिः ।
तस्यां चतुर्थ्यां त्वत्प्रीत्यै ढुण्ढे ! सर्व्वोपसर्गहृत् ॥
तां यात्रां नात्र यः कुर्य्यान्निवेद्य तिललड्डुकान् ।
उपसर्गसहस्रैस्तु स हन्तव्यो ! ममाज्ञया ॥
होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः ।
तस्यां चतुर्थ्यां मन्त्रज्ञस्तस्य मन्त्रः प्रसेत्स्यति ॥”
इति काशीखण्डे । ५० अध्याये ॥

ढोलः, पुं, (ढः ढक्का तदाकारं लातीति । ला+कः पृषोदरात् ओत्वे साधुः । ढुल उत्क्षेपे अच् । पृषोदरात् साधु र्वा ।) स्वनामख्यातवाद्यम् । यथा,—
“ढक्काढोलप्रिया नित्या ढोलवाद्यप्रमोदिनी ।
ढोलरूपा ढोलधरा ढोलशब्दस्वरूपिणी ॥”
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम् ॥

ढौक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) चतुर्द्दशस्वरी । ऋ, अडुढौकत् । ङ, ढौकते । इति दुर्गादासः ॥ (आहृतौ । मदनं ढौकते । इति कालिदासः ।

---